[1]तनुच्छत्-तनुच्छदौ-तनुच्छदः ; — —

[2]छन्नम्-[A]छन्नः-छादितः-[B]तम्, चिच्छादयिषितः, छदितः-तम्, चिच्छदिषितः, चाच्छदितः, [3]छदितः-तवान् ;

छादः, चिच्छादयिषुः, छदः, चिच्छदिषुः, चाच्छदः, छदः ;

छादयितव्यम्, चिच्छादयिषितव्यम्, छदितव्यम्, चिच्छदिषितव्यम्, चाच्छदितव्यम्, छदयितव्यम् ;

छादनीयम्, चिच्छादयिषणीयम्, छदनीयम्, चिच्छदिषणीयम्, चाच्छदनीयम्, छदनीयम् ;

छाद्यम्, चिच्छादयिष्यम्, छाद्यम्, चिच्छदिष्यम्, चाछद्यम्, छद्यम् ;

ईषच्छादः-दुश्छादः-सुच्छादः ; — — [छद्यमानः ;

छाद्यमानः-चिच्छादयिष्यमाणः, छद्यमानः, चिच्छदिष्यमाणः, चाच्छद्यमानः,

छादः, [4]प्रच्छदः-उरश्छदः-दन्तच्छदः, समुपच्छादः, [5]समुपातिच्छादः, चिच्छादयिषः, छादः, चिच्छदिषः, चाच्छदः, छदः ;

छादयितुम्, चिच्छादयिषितुम्, छदितुम्, चिच्छदिषितुम्, चाच्छदितुम्, छदयितुम् ;

छादना, चिच्छादयिषा, छत्तिः, चिच्छदिषा, चाच्छदा, छदना ;

छादनम्, चिच्छादयिषणम्, छदनम्, चिच्छदिषणम्, चाच्छदनम्, छदनम् ;

---

1. 'क्विप् च' (3-2-76) इति क्विपि, 'इस्मन्त्रन्क्विषु च' (6-4-97) इति णौ, उपधायाः ह्रस्वः ।

2. 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' (7-2-27) इति ण्यन्तात्, निष्ठायाः इडभावः उपधाह्रस्वत्वं च निपात्यते । 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठानत्वम् । पक्षे **छादितः** इत्यपि भवति ।

3. 'निष्ठायां सेटि' (6-4-52) इति णिलोपः ।

4. **छादेः** करणार्थे, **प्रच्छाद्यतेऽनेने**त्यर्थे, 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति घप्रत्यये, '**छादेर्घे**ऽद्व्युपसर्गस्य' (6-4-96) इति उपधाह्रस्वः । एवं **दन्तच्छदः उरश्छदः** इत्यादिष्वपि ज्ञेयम् ।

5. 'अद्विप्रभृत्युपसर्गस्येति वक्तव्यम्' (वा-6-4-96) इत्युक्तत्वात् द्विप्रभृतिषूपसर्गेषु सत्स्वपि ह्रस्वो न प्रवर्तते ।

A. '**प्रच्छन्न**स्तरुगहनैः स गुल्मजालैः लक्ष्मीवाननुपदमस्य सम्प्रतस्थे ॥'

**किरातार्जुनीये** 12-54.

B. '**आच्छादि**तायतदिगम्बरमुच्चकैर्गामाक्रम्य संस्थितमुदग्रविशालश्रृङ्गम् ।'

**शिशुपालवधे** 4-19.